नवमः पाठः

# कवयामि वयामि यामि



**महाशय! अहं त्रुटितान् तन्तून् संयोजयामि।**

**यशोधरा** स्वाते! कुत्र गच्छसि ?

**स्वातिः** ननु अहं गच्छामि अशिक्षितान् पाठयितुम्।

**यशोधरा** अतीव शोभनं कार्यम्। अद्यत्वे शिक्षायाः महत्त्वं सर्वे जानन्ति।

**स्वातिः** शिक्षां विना तु जीवनम् अपूर्णमेव। किं न पठितं चतुर्थे पाठे यत् विद्याहीनाः न शोभन्ते निर्गन्धाः इव किंशुकाः।

**यशोधरा** आम्! मया अपि पठितं भोजराज्यस्य राज्ये सर्वे एव नागरिकाः न केवलं शिक्षिताः अपितु काव्यम् अपि कर्तुं जानन्ति स्म।

**स्वातिः** किं कथयसि? सर्वे एव कवयः!

**यशोधरा** सत्यम्। पठनीयं खलु एतत् नाटकम् – 'कवयामि वयामि यामि।'

नवमः पाठः

# कवयामि वयामि यामि

## प्रथमं दृश्यम्

(धारानगर्यां भोजराजस्य राजसभा। सर्वे अमात्याः कर्मचारिणः च यथास्थानम् आसनानि अध्यासते।)

(प्रविश्य)

**द्वारपालः** जयतु देवः। द्रविडदेशीयः लक्ष्मीधरनामा कश्चिद् विद्वान् देवस्य दर्शनार्थं द्वारदेशम् अध्यास्ते।

**भोजः** सादरं प्रवेशय।

**द्वारपालः** यथा आदिशति देवः। (निष्क्रान्तः)

**लक्ष्मीधरः** (द्वारपालेन सह प्रविश्य), राजन्! अभिवादये भवन्तम्। दिनकरदीप्तिरिव भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु। वर्धन्तां विभवाः सौख्यानि च। लसन्तु सम्पदः, विलयं व्रजन्तु च विपदः। प्रतिष्ठां लभतां विद्वद्गणः। सततम् एधतां विद्यासु कलासु च भवदनुरागः। श्रूयताम्–

**क्षमा दाता गुणग्राही स्वामी पुण्येन लभ्यते।**
**अनुकूलः शुचिर्दक्षः कविर्विद्वान् सुदुर्लभः॥**

**भोजः** अनुगृहीतोऽस्मि। कुतः समागमनम् अत्रभवताम् ?

**लक्ष्मीधरः** राजन्! यत्र जलपूर्णं सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि।

**भोजः** ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर! नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एष पण्डितवरः वासयितव्यः।

**मन्त्री** यथा आज्ञापयति देवः। (निष्क्रम्य पुनः नगरपालेन सह प्रविश्य)

**नगरपालः** महाराज! मन्त्रिवरस्य आदेशेन अहं समस्ते नगरे भ्रान्त्वा कमपि निरक्षरं मूर्खं वा जनं न अपश्यम्। कुत्र वासयितव्यः पण्डितवर्यः ?

**भोजः** (क्षणं विचार्य) भो नगरपाल! त्वं भूयः नगरं याहि। यः नागरिकः काव्यं कर्तुं न जानाति, स निष्कास्यताम्।

## द्वितीयं दृश्यम्

**नगरपालः** (तन्तुवायं प्रति) भो किमेतत् करोषि ?

**तन्तुवायः** महाशय! अहं त्रटितान् तन्तून् संयोजयामि।

**नगरपालः** किं पठितोऽसि ?

**तन्तुवायः** आम्, मया गुरुकुले शिक्षा गृहीता।

**नगरपालः** किं काव्यरचनां जानासि ?

**तन्तुवायः** पश्यतु एव भवान्। तन्तुसंयोजने व्यग्रोऽहं कथं काव्यं कुर्याम् ?

**नगरपालः** तर्हि त्वया मया सह राजसभां गन्तव्यम्।

**तन्तुवायः** प्रसीदतु भवान्! तत्र गत्वा किं करिष्यामि। दयस्व, मयि दयस्व। तत्र गमनेन मम कार्यहानिः भविष्यति।

**नगरपालः** नाहं जाने। त्वया गन्तव्यमेव। एष राजदेशः। विसृज कार्यम्। झटिति आगच्छ मया साकम्।

**तन्तुवायः** राजादेश इति। गन्तव्यमेव, नास्ति उपायः। चलामि नगरपालक! चलामि।

## तृतीयं दृश्यम्

**(राजसभा। सर्वे यथापूर्वम् उपविष्टाः।)**

**नगरपालः** (प्रविश्य) महाराज! अनीतोऽयं कुविन्दः। अयं काव्यं कर्तुं न जानाति।

**भोजराजः** (कुविन्दं प्रति) भोः त्वं काव्यं कर्तुं न जानीषे। अतः राजकोषात् धनं गृहीत्वा कवचिदन्यत्र प्रस्थानं कुरु। तव गृहे एष पण्डितवरः सकुटुम्बः स्थास्यति।

**तन्तुवायः** राजन्! राजनियमः तु मया पालनीयः एव तथापि श्रूयतां मम एकं निवेदनम्।

**भोजराजः** त्वरितं ब्रूहि!

**तन्तुवायः** महाराज! तन्तुवयनं मम व्यवसायः। अहं रात्रिन्दिवं परिश्रम्य अनेन व्यवसायेन जीविकामर्जयामि। काव्यरचनायां महाकवितुल्यः मम अभ्यासः नास्ति तथापि किञ्चित् निवेदयामि। श्रोतुमर्हन्ति भवन्तः –

**काव्यं करोमि नहि चारुतरं करोमि**
**यत्नात् करोमि यदि चारुतरं करोमि।**
**भूपालमौलिमणिमण्डितपादपीठ**
**हे साहसाङ्क! कवयामि वयामि यामि॥**

**भोजः** साधु कुविन्द! साधु! कीदृशी लालित्यपूर्णा पदयोजना 'कवयामि वयामि यामि' धन्योऽसि त्वम्। अहमपि आत्मानं धन्यं मन्ये, यस्य राज्ये तन्तुवायाः, कुम्भकाराः, अयस्काराः, शिल्पिनः, श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति।

(तन्तुवायं प्रति) भो ! कविवर! गृहाण पुष्कलं स्वर्णमयं पारितोषिकम्। निजम् आवासं च प्रयाहि। (मन्त्रिणं प्रति) पण्डितः लक्ष्मीधरः मम राजभवने वासयितव्यः, यावद् अपरा व्यवस्था न भवति।

(राजा तन्तुवायाय स्वर्णमुद्राः अर्पयति। तन्तुवायः पारितोषिकं प्राप्य प्रसन्नवदनः राजानम् अभिवाद्य गृहं प्रयाति)।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अत्रभवताम्** (सर्व०) [अत्रभवत्, ष०ब०व०] | श्रीमताम् | आपका | of your majesty. |
| **अध्यासते** (क्रि०) [अधि+आस्, लट्, प्र०पु०ब०व०] | उपविशन्ति | बैठे हैं | are seated. |

| | | | |
|---|---|---|---|
| **अपठितम्**<br>(सं ०) [न पठितः अपठितः, तम्<br>(नञ् त०पु०)] | अनधीतम् | अनपढ़ को | to an uneducated person. |
| **अभिवाद्य**<br>(अव्य०) [अभि+वद्+णिच्+ल्यप्] | प्रणम्य | प्रणाम करके | having saluted |
| **अमात्याः**<br>(सं०) (पु०प्र०ब०व०) | मन्त्रिणः | सचिवगण | ministers. |
| **अयस्काराः** (सं०)<br>[अयसा कुर्वन्ति इति (उप० त०पु०] | लौहकाराः | लोहार, लुहार | ironsmiths. |
| **आदिश्यताम्**<br>(क्रि०) [आ+दिश् (कर्म०) लो०,<br>प्र०पु०ए०व०] | आज्ञाप्यताम्, आज्ञा दीयताम् | आज्ञा दीजिए | command (him). |
| **आप्नोतु**<br>(प्रसारम्)(क्रि०) [आप्० लो० प्र०पु०ए०व०] | तनोतु | फैले | may spread. |
| **एधताम्**<br>(क्रि०) [एध् लो० प्र०पु०ए०व०] | वृद्धिं प्राप्नोतु | बढ़े | may prosper. |
| **कवयामि**<br>(क्रि०) (कवि+णिच्+लट् उ०पु०ए०व०)<br>(नामधातु) | काव्यं करोमि | काव्यरचना करता हूँ | I compose a poem/verse. |
| **कुविन्दः**<br>(सं०) (पुं०प्र०ए०व०) | तन्तुवायः | जुलाहा | weaver. |
| **कृतनिवासम्**<br>(वि०) (द्वि०ए०व०)[कृतः निवासः येन तम्<br>ब०व्री०] | वसन्तम् | रहने वाले को | to an inhabitant.. |
| **क्षमी**<br>(वि०)(पु०प्र०ए०व०) | क्षमाशीलः | क्षमा करने वाला | forgiver. |
| **चारुतरम्**<br>(वि०) (नपुं०प्र०ए०व०)[चारु+तरप्] | सुन्दरतरम् | अधिक सुन्दर | finer (composition) |
| **जाने**<br>(क्रि०)(ज्ञा०आ० लट् उ०पु०ए०व०] | जानामि | जानता हूँ | I know. |

| | | | |
|---|---|---|---|
| **तन्तुवयनम्**<br>(सं०) [तन्तूनां वयनम् (ष०त०पु०)] | सूत्राणां वयनकर्म | धागों से वस्त्र बनाना | weaving the cloth. |
| **तन्तुवाय:**<br>(सं०) | कुविन्द: | जुलाहा | weaver. |
| **त्वरितम्**<br>(अव्य०) | शीघ्रम्, अचिरम्, क्षिप्रम् | जल्दी | quickly. |
| **दक्ष:**<br>(वि०) (पु०प्र०ए०व०) | प्रवीण:, निपुण:, चतुर: | प्रवीण | competent, skilled, efficient. |
| **दयस्व**<br>(क्रि०)[दय्+लो०म०पु०ए० व०] | दयां कुरु | दया करो | have pity on me. |
| **दिक्षु**<br>(सं०) (दिश्, स्त्री० बहु० व०) | दिशासु | दिशाओं में | in all the directions. |
| **दीप्ति:**<br>दीप्+क्तिन्० (सं०) स्त्री० (प्र० ए० व०) | प्रकाश: | चमक | lustre. |
| **निरक्षरम्**<br>(वि०) [निर्गतानि अक्षराणि यस्मात् स: तम्<br>(ब०व्री०)] | अक्षरज्ञानशून्यम् | अनपढ को | to an illiterate. |
| **निवस्तुम्** (अव्य०)<br>[नि+वस्+तुमुन्] | निवासाय | रहने के लिए | for living. |
| **निष्कास्यताम्**<br>(क्रि०) [निस्+कस्+णिच् (कर्मवा०)]<br>(लोट्, प्र०पु०ए०व०) | नि:सार्यताम् | निकालिए | expel, turnout. |
| **निष्क्रम्य**<br>(अव्य०)[निस्+क्रम्+ल्यप् ] | बहि: गत्वा | निकलकर, बाहर जाकर | having gone out |
| **निष्क्रान्त:**<br>(वि०) [निस्+क्रम्+क्त, पुं०प्र०ए०व०] | बहि: अगच्छत् | चला गया | went out. |
| **निस्सार्य**<br>(अव्य०) [निस्+सृ+णिच्+ल्यप्] | निष्कास्य | निकालकर | having turned out. |
| **पुष्कलम्**<br>(वि०) [द्वि०ए०व०] | प्रभूतम् | बहुत अधिक | in abundance. |

| | | | |
|---|---|---|---|
| **प्रयाहि**<br>(क्रि०) [प्र+या+लो०म०पु०ए०व०] | गच्छ | जाओ | go. |
| **प्रवेशय**<br>(क्रि०) [प्र+विश्+लो०+णिच् म०पु०ए०व०] | प्रवेशं कारय | प्रवेश कराओ | ask (him) to enter. |
| **प्रसन्नवदनः**<br>(वि०) [प्रसन्नं वदनं यस्य सः (ब०व्री०)] | प्रसन्नमुखः | खिले हुए चेहरे वाला, | delighted. one feeling |
| **प्रसीदतु**<br>(क्रि०) [प्र+सद् लो० प्र०पु०ए०व०] | प्रसन्नः भवतु | प्रसन्न हो | be happy. |
| **भवादृशाः**<br>(वि०) [भवत्+दृश् प्र०ब०व०] | भवत्समानाः | आप जैसे | people like you. |
| **भूपालमौलिमणिमण्डितपादपीठ**<br>[भूपालानां मौलौ ये मणयः (सं०त०पु०), तैः मण्डितम् (तृ०त०पु०) पादयोः पीठं यस्य सः, तत्सम्बोधने (ब०व्री०)] | राज्ञां मस्तकमणिभिः पादपीठं शोभितम् अस्ति यस्य सः | (प्रणाम करते हुए) राजाओं के शिरों की मुकुटमणियों से सुशोभित पदापीठ चरण वाले (हे राजन्!) | O king whose foot rest is adorned with the jewels of the crowns of kings. |
| **भूयः**<br>(अव्यं०) | पुनः | फिर | again. |
| **भ्रान्त्वा**<br>(अव्य०) (भ्रम्+क्त्वा) | इतस्ततः गत्वा | घूमकर | having wondered. |
| **यामि**<br>(क्रि०) (या, लट् उ० पु०ए०व०) | गच्छामि | जाता हूँ | I go. |
| **लसन्तु**<br>(क्रि०)(लस्, लो०प्र०पु०ब०व०) | शोभन्ताम् | शोभित हो | may prosper. |
| **वयामि**<br>(क्रि०)(वे, लट् उ० पु०ए०व०) | वयनकर्म करोमि | बुनने का काम करता हूँ | I weave |
| **वासयितव्यः**<br>(वि०) (पुं०प्र०ए०व०) [वस्+णिच्+तव्यत्] | निवासः प्रदेयः | बसाना चाहिए | needs to be provided with a dwelling place. |
| **विभवाः**<br>(सं०) (पुं०प्र०ब०व०) | धनानि | धन | wealth. |

| | | | |
|---|---|---|---|
| **विसृज**<br>(क्रि०) [वि+सृज्० लो०म०पु०ए०व०] | त्यज, मुञ्च | छोड़ो | stop, leave. |
| **व्यग्रः**<br>(वि०) (पुं०प्र०ए०व०) | व्याकुलः | घबराया हुआ | disturbed, distressed. |
| **शुचिः**<br>(सं०)(पुं०प्र०ए०व०) | पूतः | पवित्र | pure. |
| **श्रूयताम्**<br>(क्रि०) [श्रु+कर्मवा०, लो०प्र०पु०ए०व०] | आकर्ण्यताम् | सुनिये | listen (to me) |
| **समाहूय**<br>(अव्य०) (सम्+आ+ह्वे+ल्यप्) | आकार्य, आह्वानं कृत्वा | बुलाकर | after calling. |
| **साहसाङ्क**<br>(वि०) (पुं०सम्बो०ए०व०) [साहसम् एव अङ्कः यस्य सः तत्सम्बुद्धौ (ब०व्री०)] | हे साहसिन्! | हे साहसी, हे साहस के प्रतीक | oh valorous! |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| कश्चिद् | = | कः+चिद् | दर्शनार्थम् | = | दर्शन+अर्थम् |
| दिनकरदीप्तिरिव | = | दिनकरदीप्तिः+इव | भवदनुरागः | = | भवत्+अनुरागः |
| अनुगृहीतोऽस्मि | = | अनुगृहीतः+अस्मि | भवद्राज्ये | = | भवत्+राज्ये |
| राजादेशः | = | राज+आदेशः | क्वचिदन्यत्र | = | क्वचित्+अन्यत्र |
| रात्रिन्दिवम् | = | रात्रिम्+दिवम् | | | |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| यथा+आदिशति | = | यथादिशति | झटिति+आगच्छ | = | झटित्यागच्छ |
| मम+एकम् | = | ममैकम् | नास्ति+उपायः | = | नास्त्युपायः |

### संयोगः

| | | | | | |
|---|---|---|---|---|---|
| समागमनम् | = | सम्+आगमनम् | कमपि | = | कम्+अपि |
| गन्तव्यमेव | = | गन्तव्यम्+एव | जीविकामर्जयामि | = | जीविकाम्+अर्जयामि |

# अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) भोजराजः कस्य राज्यस्य नरेशः आसीत् ? ..............................

(ख) कः विद्वान् राजदर्शनार्थं समायातः ? ..............................

(ग) लक्ष्मीधरेण कस्मै आशीर्वादः दीयते ? ..............................

(घ) यत्र जलपूर्णं सरः भवति, तत्र के आगच्छन्ति ? ..............................

(ङ) लक्ष्मीधरः किं समाकर्ण्य धरानगरीम् आगच्छति ? ..............................

(च) निवासव्यवस्थायै मन्त्री कम् आदिशति ? ..............................

(छ) भोजराजेन स्वराज्यात् कस्य निःसारणादेशः कृतः ? ..............................

2. **पूर्णवाक्येन अधोलिखितप्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(क) लक्ष्मीधरेण कः आशीर्वादः राज्ञे प्रदत्तः ?

..............................................................................................

(ख) लक्ष्मीधरः कस्य गृहे वासयितव्यः आसीत् ?

..............................................................................................

(ग) तन्तुवायः केन जीविकाम् अर्जयति स्म ?

..............................................................................................

(घ) तन्तुवायेन यत्पद्यं रचयित्वा श्रावितं तस्य प्रथमां पङ्क्तिं लिखत।

..............................................................................................

(ङ) यावद् अपरा व्यवस्था न भवति तावत् लक्ष्मीधरः कुत्र वासयितव्यः आसीत् ?

..............................................................................................

(च) तन्तुवायस्य पदयोजना कीदृशी आसीत् ?

..............................................................................................

(छ) भोजराजः सन्तुष्टो भूत्वा कं प्रशंसति ?

..............................................................................................

**3. स्थूलाक्षरपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) लक्ष्मीधरः **द्वारपालेन** सह प्रविशति।

.......................................................................................................

(ख) यत्र जलपूर्णं सरः भवति तत्र **पक्षिणः** स्वयं समायान्ति।

.......................................................................................................

(ग) अहं **त्रुटितान्** तन्तून् संयोजयामि।

.......................................................................................................

(घ) तन्तुवायेन **गुरुकुले** शिक्षा गृहीता।

.......................................................................................................

(ङ) राजा **तन्तुवायाय** स्वर्णमुद्राः अर्पयति।

.......................................................................................................

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'दिनकरदीप्तिरिव भवकीर्तिः दिक्षु प्रसारम् आप्नोतु।' अस्मिन् वाक्ये क्रियापदं किम्?

(ख) 'तत्र पक्षिणः स्वयं समायान्ति।' अत्र 'समायान्ति' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(ग) 'महाराज! आनीतोऽयं कुविन्दः।' अस्मिन् वाक्ये 'आनीतः' इति विशेषणपदस्य किं विशेष्यपदं प्रयुक्तम्?

(घ) 'यावद् अपरा व्यवस्था न भवति।' अस्मात् वाक्यात् विशेषणपदं चित्वा लिखत।

(ङ) 'झटिति आगच्छ मया साकम्।' अस्मात् वाक्यात् 'सह' इति पदस्य पर्यायपदं चिनुत।

(च) 'तन्तुवायः राजानम् अभिवाद्य गृहं प्रयाति' अस्मिन् वाक्ये 'आयाति' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

**5. कथानकक्रमानुसारम् अधोलिखितवाक्यानि पुनः लिखत –**

(क) तन्तुवायः तन्तुवयनेन जीविकाम् अर्जयति स्म।

(ख) तन्तुवायः महाकवितुल्यः न आसीत्।

(ग) राजाभोजः मन्त्रिणं लक्ष्मीधरस्य आवासव्यवस्थायै आदिशति।

(घ) एकदा लक्ष्मीधरः भोजराजस्य सभां गच्छति।

(ङ) भोजराजः लक्ष्मीधरस्य वाक्चातुर्येण प्रसन्नः भवति।

(च) नगरपालः नगरे कमपि निरक्षरं मूर्खं वा जनं न अपश्यत्।

(छ) भोजराजः नगरपालं काव्यप्रतिभाहीनं जनं नगरात् निष्कास्य लक्ष्मीधरं वासयितुम् आदिशति।

(ज) वस्तुतः तन्तुवायः अपि कविः आसीत्।

(झ) नगरपालः तन्तुवायं राजसभां नयति।

(ञ) राजा तन्तुवायस्य पदयोजनां प्रशंसति।

**6. पर्यायवाचिनां मेलनं कृत्वा लिखत–**

| | | | | |
|---|---|---|---|---|
| (क) | अमात्यः | ................................ | (i) | कुविन्दः |
| (ख) | तन्तुवायः | ................................ | (ii) | त्वरितम् |
| (ग) | विद्वान् | ................................ | (iii) | मन्त्री |
| (घ) | झटिति | ................................ | (iv) | पण्डितः |

**7. अधोलिखितानां पदानां विपरीतार्थकान् शब्दान् पाठात् चित्वा लिखत–**

(क) गत्वा ................................

(ख) मूर्खः ................................

(ग) निरक्षरः ................................

(घ) निष्क्रम्य ................................

(ङ) सम्पदः ................................

**8. अधस्तात् दत्तानि वाक्यानि केन कं प्रति उक्तानि–**

| | वाक्यम् | केन | कम् |
|---|---|---|---|
| (क) | ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। | ............... | ............... |
| (ख) | अभिवादये भवन्तम्। दिनकरदीप्तिरिव, भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु। | ............... | ............... |
| (ग) | राजन्! यत्र जलपूर्णं सरः भवति तत्र पक्षिणः स्वयं समायान्ति। | ............... | ............... |
| (घ) | समस्ते नगरे भ्रान्त्वा कमपि निरक्षरं मूर्खं वा जनम् न अपश्यम्। | ............... | ............... |
| (ङ) | त्वं भूयः नगरं याहि। | ............... | ............... |
| (च) | महाशय! अहं त्रुटितान् तन्तून् संयोजयामि। | ............... | ............... |
| (छ) | आम्! मया गुरुकुले शिक्षा गृहीता। | ............... | ............... |
| (ज) | राजा भोजः आत्मानं धन्यं मन्यते। | ............... | ............... |
| (झ) | दयस्व, मयि दयस्व। | ............... | ............... |
| (ञ) | नगरपालं समाहूय आदिश्यताम्। | ............... | ............... |



## अन्वयः

1. **अन्वयः –** क्षमी, दाता, गुणग्राही, अनुकूलः, शुचिः, दक्षः, कविः, विद्वान्, सुदुर्लभः स्वामी पुण्येन लभ्यते।

2. **अन्वयः –** (अहम्) काव्यम् करोमि, चारुतरम् न हि करोमि। यदि यत्नात् करोमि, चारुतरम् करोमि। हे भूपाल–मौलि–मणि–मण्डित–पादपीठ! (हे) साहसाङ्क! कवयामि वयामि यामि।

# योग्यताविस्तारः

## ( क ) काव्यपरिचयः

धारानरेशस्य भोजराजस्य चरितं भोजप्रबन्धनाम्नि ग्रन्थे उपलभ्यते। महाराजः भोजः परमविद्वान्, गुणवान्, दानशीलः, कलाप्रियश्च आसीत्। तस्य राजसभायां समागताः कवयः काव्यपाठं कृत्वा विपुलं पुरस्काराशिं लभन्ते स्म। भोजप्रबन्धः गद्यपद्यमयी ललिता रचनाऽस्ति। अस्य भाषा सुबोधा व्यवहारोपयोगिनी च। षोडशशताब्द्यां जातः श्रीबल्लालसेनः अस्य ग्रन्थरत्नस्य प्रणेता।

अस्माद् ग्रन्थाद् उद्धृत्य कानिचित् पद्यानि भवतां ज्ञानवर्धनाय विनोदाय च दीयन्ते–

**बलवानप्यशक्तोऽसौ धनवानपि निर्धनः।**
**श्रुतवानपि मूर्खोऽसौ यो धर्मविमुखो जनः॥ 1॥**

**कण्ठस्था या भवेद् विद्या सा प्रकाश्या सदा बुधैः।**
**या गुरोः पुस्तके विद्या तया मूढः प्रतार्यते॥ 2॥**

**मनीषिणः सन्ति न ते हितैषिणः हितैषिणः सन्ति न ते मनीषिणः।**
**सुहृच्च विद्वानपि दुर्लभो नृणाम् यथौषधं स्वादु हितं च दुर्लभम्॥ 3॥**

**एकेन राजहंसेन या शोभा सरसोऽभवत्।**
**न सा बकसहस्रेण परितस्तीरवासिना॥ 4॥**

## ( ख ) भाषाविस्तारः

अधस्ताद् एतादृशाः शब्दाः दीयन्ते, येषाम् आदिवर्णस्य अपसारणेन नवीनशब्दः निर्मितः भवति। एतेषाम् अनुशीलनेन ज्ञानवर्धनं कुरुत –

**यथा** – कवयामि, ए० व० = कविता करता हूँ।

| | | | |
|---|---|---|---|
| 1. | कवयामि | वयामि | यामि |
| 2. | सुजनः | जनः | नः |
| 3. | चलताम् | लताम् | ताम् |
| 4. | वसताम् | सताम् | ताम् |
| 5. | तरवः | रवः | वः |
| 6. | कवयः | वयः | यः |
| 7. | राजिताः | जिताः | ताः |

# कोऽहं वदतु साम्प्रतम्

**का पाण्डुपत्नी गृहभूषणं के,**
**को रामशत्रुः किमगस्त्यजन्म?**
**सूर्यैकपुत्रो वद वेत्सि चेत्त्वं**
**कुन्ती-सुता रावणकुम्भकर्णाः॥**

**भावार्थः** – राज्ञः पाण्डोः पत्नी का अस्ति?
गृहस्य अलङ्करणानि कानि सन्ति अर्थात् गृहस्य शोभा कास्ति?
भगवतः श्रीरामस्य शत्रुः कः अस्ति?
महर्षेः अगस्त्यस्य जन्मस्थानं किम् अस्ति?
सूर्यस्य पुत्रः कः अस्ति?
श्लोकस्य अन्तिमपङ्क्तेः उत्तराणि चित्वा वदत।

# एहि हसाम

(रमेशः एकः चञ्चलप्रवृत्तिकः बालः। एकदा सः एकस्य पण्डितस्य (ज्योतिष्कस्य) समीपं गत्वा अवदत्)

**रमेशः** – पण्डितवर्य! अहं हस्ते कण्डूतिम् अनुभवामि।
**पण्डितः** – तर्हि धनलाभः भविष्यति; लक्ष्मीः आगमिष्यति।
**रमेशः** – मया कर्णे अपि कण्डूतिः अनुभूयते।
**पण्डितः** – एवं, तर्हि कर्णाभरणलाभः भविष्यति।
**रमेशः** – मम कटिप्रदेशे अपि कण्डूतिः अस्ति।
**पण्डितः** – (कोपेन) तर्हि भवतः चर्मरोगः अस्ति, यथाशीघ्रं चिकित्सालयं गच्छतु।